# संस्कृत-वार्ता:

**दिनाङ्क :- 21.06.2025** **सायम् :- 06:20**

आदौ-मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना योगदिवसावसरे उक्तं यत् अद्य योगः विश्वस्य विभिन्नेषु भागेषु वर्धमानस्य मनस्संतापस्य, अशान्तेः, अस्थिरतायाः च मध्ये शान्तेः मार्गम् प्रददाति।
- नागरिक-विमानपत्तन-महानिदेशालयः एयर्-इण्डिया इति संस्थाय□ निर्देशं दत्तवान् यत् गभीरतया नियमोल्लङ्ल्लंघनमुद्दिश्य त्रयः अधिकारिणः तत्क्षणप्रभावेन निष्कासयन्त्विति।
- क्षेत्रीय-ऐक्यस्य महत्त्वपूर्णेन भावेन, ईरान्-देशे विलम्बितान् नेपाल-श्रीलङ्का-देशयोः नागरिकान् प्रत्यावर्तने समावेशयितुं ऑपरेशन्-सिन्धु इत्यस्यान्तर्गतं भारतं स्वस्य निर्वासनप्रयासान् प्रावर्तयत्।
- इजरायल-इरान्-देशयोर्द्वन्द्वस्य नवमे दिनेपि प्रक्षेपास्त्राणां प्रहारः प्रचलति। क्यूम्-नगरस्य एकस्मिन् आवाससमूहे कृताक्रमणे ईरान-देशस्य एकः वरिष्ठः सेनापतिः सईद इजादी मृतः।
- तेण्डुल्कर्-एण्डर्सन्-ट्रोफीति-निकषस्पर्धायाः पञ्च-क्रीडा-श्रृङ्खलायां द्वितीयदिवसे जलपानावकाशं यावत् भारतेन षट् क्रीडकाणाम् हानौ चुर्तुपंचाशदुत्तरचतुश्शत-धावनाङ्काः रचिताः।

-------------------------------------------------------

पीएम-योग दिवस

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् अद्य योगः विश्वस्य विभिन्नेषु भागेषु वर्धमानस्य मनस्संतापस्य, अशान्तेः, अस्थिरतायाः च मध्ये शान्तेः मार्गम् प्रददाति, तथा च शान्तियुतं, सन्तुलितं, सुस्थिरं च विश्वं प्रवर्तयितुं सामूहिकप्रयासस्य आह्वानम् करोति। सः अवदत् यत् योगः विश्वं संघर्षात् सहकारं प्रति नयेदिति। आन्ध्रप्रदेशस्य विशाखापट्नं-नगरस्य रमणीय-समुद्रतटं निकषा एकादशं अन्ताराष्ट्रिय-योग-दिवसोत्सवम् संबोधयन् प्रधानमन्त्री अवदत् यत् योगः एकः विरामचिह्नः अस्ति यतो हि मानवजातीनां श्वासोच्छवासयोः सन्तुलनं कर्तुं, पुनः स्वस्थं भवितुं च आवश्यकं भवति।

प्रधानमन्त्री अवदत् यत्, अस्मिन् वर्षे दिवसस्यास्य विषयवस्तुः 'योगा फ़ोर् वन् अर्थ्, वन् हेल्थ' इति अस्ति। सः अवदत् यत् जगति योगस्य प्रसाराय, भारतं आधुनिकशोधमाध्यमेन योगविज्ञानं इतोऽपि सुदृढं करोति, यस्मिन् देशस्य प्रमुखाः चिकित्सा-संस्थाः योगविषयिक- संशोधने निरताः सन्ति।

-------------------------------------------------------

योगदिवसः

अन्ताराष्ट्रिय-योगदिवसः सम्पूर्णे देशे सोत्साहं समाचर्यते। अद्य देहरादून्-नगरस्य 'पुलिस लाइन' इति क्षेत्रे आयोजिते योगशिविरे राष्ट्रपतिः द्रौपदी मुर्मुः भागम् अगृह्णात्। विश्व-मञ्चे योगस्य प्रोत्साहने भारतस्य महत्त्वपूर्णां भूमिकां

प्रकाशयन्ती सा अवदत् यत्, अधुना विश्व-समुदायः योगस्य विषये अधिकम् आदरं धारयति, येन महाद्वीपेषु जनाः तस्य लाभमपि अनुभवन्ति।

लद्दाख्-नगरे कार्गिल्-क्षेत्रस्य क्री-सुल्तान्-चू-क्रीडाङ्गणे अन्ताराष्ट्रिय-योगदिवसः अत्यन्तोत्साहेन आचर्यत। गोवाराज्ये मुख्यमन्त्री डा. प्रमोद सावन्तः तालीगांव्-नगरस्य श्यामा प्रसाद-मुखर्जी-क्रीडाङ्गणे योगदिवसस्य कार्यक्रमस्य नेतृत्वं कृतवान्। सः योगः विश्वस्य कृते भारतस्य महान् उपहारः इति च उद्घोषितवान्। गोवाराज्ये एकादशः अन्ताराष्ट्रिय-योगदिवसः व□वेन आध्यात्मिकशक्त्या च आचर्यते। केन्द्रीय-नवीन-पुनर्नवीकरणीय-ऊर्जा-राज्यमन्त्री श्रीपाद-नायकः ओल्ड्-गोवा-नगरस्य भव्य-चर्च्-कन्वेण्ट्-इति विश्वविदितस्थले उत्सवस्यास्य नेतृत्वं कृतवान्। सभाम् सम्बोधयन् सः, कथं योगः न केवलं शरीरम् अपितु मनसः आत्मनश्च पोषणं करोतीति उक्तवान्।

-----------------------------------------------------

<u>योगदिवसः-आकाशवाणीः</u>

राष्ट्रिय-राजधान्यां आकाशवाणी-मुख्यालयेऽपि विशेष-योग-सत्रस्य आयोजनम् अभवत्। आकाशवाण्याः महानिदेशिका डॉ. प्रज्ञा पालिवाल् गौड़ इत्यनया साकम् अतिरिक्तमहानिदेशकः एल्. मधु नागश्च अधिकारिभिः कर्मचारिभिश्च समं कार्यक्रमेऽस्मिन् भागम् गृहित्वा, योगासनानां अभ्यासम् अकुरुताम्।

-----------------------------------------------------

<u>रियाद-योगः</u>

रियाददेशस्य भारतीयदूतावासेन अन्ताराष्ट्रिय योगदिवसः सोल्लासं समाचरितः। अनेन□ प्रकरेण विभिन्नदेशस्थ□भारतीयदूतावासै□पि दिवसस्यास्य समायोजनं जनान् संयोज्य उत्साहपूर्वकं समाचरितम्।

-----------------------------------------------------

<u>डीजीसीए-एयर इंडिया</u>

नागरिक-विमानपत्तन-महानिदेशालयः एयर्-इण्डिया इति संस्थाय□निर्देशं दत्तवान् यत् गभीरतया नियमोल्लङ्घनमुद्दिश्य त्रयः अधिकारिणः तत्क्षणप्रभावेन निष्कासयन्त्विति। आन्तरिक-अनुशासनात्मक-कार्याचरणाय च निर्देशं दत्तवान्; सह□हि परिणामानां प्रस्तुतिः दशदिनेषु निवेदयत्विति निर्देशं दत्तवान्। एकस्मिन् वक्तव्ये, डी. जी. सी. ए. इत्यनेन उक्तम् यत् एते अधिकारिणः परिचालन-दोषाणां कृते उत्तरदायिनौ स्तः इति।

-----------------------------------------------------

<u>आपरेशन् सिन्धु-एस्. एल्. व□नेपालः</u>

क्षेत्रीय-ऐक्यस्य महत्त्वपूर्णेन भावेन, ईरान्-देशे विलम्बितान् नेपाल-श्रीलङ्का-देशयोः नागरिकान् प्रत्यावर्तने समावेशयितुं आपरेशन्-सिन्धु इत्यस्यान्तर्गतं भारतं स्वस्य निर्वासनप्रयासान् प्रावर्तयत्। एक्स इत्यत्र प्रदत्ते संदेशे उक्तमस्ति यत् नेपाल-श्रीलङ्का-सर्वकारयोः औपचारिक-अनुरोधानुगुणं एतत् कार्यम् अभवदिति।

---------------------------------------------------------

इजरायल-ईरान-सङ्घर्षः

इजरायल-इरान्-देशयोर्द्वन्द्वस्य नवमे दिनेपि प्रक्षेपास्त्राणां प्रहारः प्रचलति। गतरात्रौ एव इजरायल-देशेन इरान्-देशस्य परमाणु-संरचनां विरुध्य सैन्य-कार्याचरणं कृतम्। इजरायलसैन्यप्रवक्त्रा उक्तं यत्, मध्य-इरान्-देशे क्षेपणास्त्र-भण्डारस्य, आधारभूत-संरचना-स्थलानि विरुध्य आक्रमणानां श्रृङ्खला समारब्धास्ति। इजरायलस्य रक्षामन्त्रिणा इजरायल् कात्ज इत्यनेन उक्तं यत्, क्यूम्-नगरस्य एकस्मिन् आवाससमूहे कृताक्रमणे ईरान-देशस्य एकः वरिष्ठः सेनापतिः सईद इजादी मृतः। अद्य प्रातःकाले इस्फाहान-नगरस्य परमाणुकेन्द्रे इजरायल्-देशपक्षतः आक्रमणस्य सूचना अपि ईरानी संचार-माध्यमेन प्रदत्तास्ति । इरानस्य वायुरक्षया च अस्याक्रमणस्य प्रतिक्रिया प्रदत्ता इत्यपि उच्यते ।

---------------------------------------------------------

प्रत्यक्ष-कर-सङ्ग्रहः

आर्थिकवर्षेऽस्मिन् देशस्य सकल-प्रत्यक्ष-कर-सङ्ग्रहः दशमलव अष्ट-षडुत्तर-चतुर् प्रतिशतं वृद्धिं प्राप्य जूनमासस्य एकोनविंशति दिनाङ्कपर्यन्तं प्रायः सार्धपञ्च- लक्ष-कोटिरूप्यकाणि अभवत्, गतवर्षस्य च समानकाले प्रायः सपादपञ्च लक्ष-कोटिरूप्यकाणि आसीत्।

---------------------------------------------------------

उत्तराखंड-पञ्चायत

उत्तराखण्डप्रदेशे त्रिचरणीय-पञ्चायत-निर्वाचनेषु प्रथम चरणीय मतदानम् अग्रिम मासस्य दशमे दिनाङ्के भविता।

---------------------------------------------------------

बिहार-वार्धक्यराशि:

बिहार प्रशासनेन वृद्धेभ्य: दीयमानं द्रव्यात्मकं सेवानिवृत्ति उत वार्धक्य-सहायताराशि: सप्तशतम् रुप्यकेभ्य: सहस्रमिति वर्धितमस्ति।

---------------------------------------------------------

भारत-इङ्ग्लैण्ड्-क्रिकेट्-निकषस्पर्धा

क्रिकेट्-क्रीडायां, भारत-इङ्ग्लेण्ड्-देशयोः मध्ये तेण्डुल्कर्-एण्डर्सन्-ट्रोफीति-निकषस्पर्धायाः पञ्च-क्रीडा-श्रृङ्खलायाः प्रथम-क्रीडा लीड्स्-नगरस्य हेडिङ्ग्ले-क्रीडाङ्गणे प्रचलति, यत्र द्वितीयदिवसस्य जलपानावकाशं यावत् भारतेन षट् क्रीडकाणाम् हानौ चुर्तुपंचाशदुत्तरचतुश्शत-धावनाङ्काः रचिताः।

॥ इति वार्ता: ॥